८चित्रमृगे ९वाद्यभेदे १०वस्त्रे शब्दर० ११नानावर्णे १२मयूरे १३कामदेवे १४चापे १५कोषे १६स्वर्णे १७आभरणे १८पद्मे १९शङ्खे २०चन्दने २१कर्पूरे २२पुष्पे २३कोकिले २४मेघे २५सिंहे २६रात्रौ २७भूमौ २८दीप्तौ च नानार्थकोषः। शारङ्गमप्यत्र शब्द०। शारङ्गोऽपि चित्रमृगादौ। चित्रवर्णे त्रि०अमरः। सर्वत्र जातौ स्त्रियां ङीप्

**सारङ्गिक** पु० सारङ्गं मृगं हन्ति ठक्। व्याधे त्रि०को०।

**सारज** न० सारात् दध्यग्रात् जायते जन-ड। नवनीते शब्दच०।

**सारण** न० सृ-णिच्-ल्यु। १गन्धद्रव्ये धरणिः। २अतीसाररोगे ३रावणसचिवभेदे च हेमच०। ४भद्रबलायां धरणिः ५आम्रातके शब्दच०।

**सारणि(णी)** स्त्री सृ-णिच्-अनि वा ङीप्। १क्षुद्रनद्यां २प्रसारिण्याम् उणादि० सङ्क्षेपेणाङ्कभेद सूचितग्रहगत्यादिबोधके ज्योतिषग्रन्थभेदे च।

**सारण्ड** पु०सृ-णिच् वा०अण्ड। सर्पाण्डे जटा०। [श्रयः।

**सारतरु** पु० सारप्रधानः जलप्रधानस्तरुः। कदलीवृक्षे धन-

**सारथि** पु० सृ-अथिण्, सह रथेन सरथः घोटकः तत्र नियुक्तः इञ् वा। रथादिवाहनप्रेरके नियन्तरि अमरः। तल्लक्षणं मात्स्ये १८९ अ० यथा "निमित्तशकुनज्ञो हयशिक्षाविशारदः। हयायुर्वेदतत्त्वज्ञो भूमिभागविशेषवित्। स्वामिभक्तो महोत्साही सर्वेषां च प्रियंवदः। शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः"।

**सारदा** स्त्री सारं ददाति दा-क। १सरस्वत्याम् शब्दर०। "लिखति यदि गृहीत्वा सारदा सर्वकालम्" शिवस्तवः। २सारदातरि त्रि०।

**सारद्रुम** पु० सारप्रधानो द्रुमः। खदिरवृक्षे राजनि०।

**सारपादप** पु०सारयति सारः नित्यक०। धामनिवृक्षे रत्नमा०

**सारभाण्ड** न० कर्म०। १बहुमूल्यपात्रे २भेषजपात्रे च।

**सारमिति** पु० सारं यथार्थं मिनोत्यनेन मा-करणे क्तिच्। १वेदे हेमच० भावे क्तिच्। २सारज्ञाने स्त्री।

**सारमूषिका** स्त्री सारे मूषिकेवापहारकत्वात्। देवदालीवृक्षे राजनि०। [१कुक्कुरे २तद्योषिति स्त्री ङीप्।

**सारमेय** पुंस्त्री सरमायाः कश्यपपत्न्याः अपत्यम् ढक्।

**सारलौह** न० लौहेषु सारः राज०। लौहसारे (इस्पात)

**सारव** त्रि० सरय्वां भवः अण् नि०। सरयूनदीभवे अमरः

**सारस** न० सरो नियतवसतिरस्य अण्। १पद्मे अमरः २कट्याभरणे च। सह रसेन स्वार्थे अण्। ३चन्द्रे ४स्वनामख्याते पक्षिणि पुंस्त्री०। स्त्रियां ङीष्। सरस इदम् अण्। ५सरोवरसम्बन्धिनि त्रि०। "नद्याः शैलवराच्चाम्भो यत्र संस्कृत्य तिष्ठति। तत्सरोजं जलं छन्नं सारसं परिकीर्त्तितम्" भावप्र० उक्ते ६जलभेदे "सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु। रोचनं तुवरं रूक्षं बद्धमूत्रमलं हितम्" तत्रोक्तास्तद्गुणाः।

**सारसन** न० सारं सनोति सन-अच्। १स्त्रीकट्याभरणे काञ्च्यां कञ्चुकादार्थं मध्यकाये निबद्धे २पट्टिकादौ च अमरः।

**सारस्वत** पु० सरस्वती देवताऽस्य, सरस्वत्या इदं वा अण्। १बिल्वदण्डे २देशभेदे हेमच०। पञ्चगौडमध्ये ३ब्राह्मणभेदे ४सरस्वतीप्रतिपालितमुनिभेदे ५ब्राह्मदिनरूपे कल्पभेदे च "सारस्वतस्य कल्पस्येति" मत्स्यपुराणम् ६सरस्वतीसम्बन्धिनि त्रि० "तस्यां पूर्वाह्णसमये कुर्य्यात् सारस्वतोत्सवम्" ति०त०। ७सरस्वतीदेवताके च त्रि०। "तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैरिति" स्मृतिः। मुनिभेदजन्मकथा च भा०श०५२अ० "ब्रह्मर्षे! (दधीच!) तव पुत्रोऽयं त्वद्भक्त्या धारितो मया। दृष्ट्वा तेऽप्सरसं रेतो यत् स्कन्नं प्रागजम्बुधाम्। तत् कुक्षिणा वै ब्रह्मर्षे! त्वद्भक्त्या धृतवत्यहम्" इत्युपक्रमे "तस्मात् सारस्वतः पुत्रो महांस्ते वरवर्णिनि!। तवैव नाम्ना प्रथितः पुत्रस्ते लोकभावनः। सारस्वत इति ख्यातो भविष्यति यथातपाः। एष द्वादश वार्षिक्यामनावृष्ट्यां द्विजर्षभान्। सारस्वतो महाभागो वेदानध्यापयिष्यति" इति सरस्वतीं प्रति दधीचोक्तिः तस्य वेदाध्यापनकथा च तत्रैव अध्यायशेषे "अनावृष्टिरनुप्राप्ता राजन् द्वादशवार्षिकी। तस्यां द्वादशवार्षिक्यामनावृष्टौ महर्षयः। वृत्त्यर्थं प्राद्रवन् राजन्! क्षुधार्त्ताः सर्वतो दिशम्। दिग्भ्यस्तान् प्रद्रुतान् दृष्ट्वा मुनिः सारस्वतस्तदा। गमनाय मतिञ्चक्रे तमुवाच सरस्वती। न गन्तव्यमितः पुत्र! तवाहारमहं सदा। दास्यामि मत्स्यप्रवरानुष्यतामिह भारत!" ततः तद्दत्तमत्स्याहारेण प्राणानधारयत् वेदांश्चाधारयत् अतीतायामनावृष्टौ अध्ययनाभावेन नष्टवेदा अन्ये मुनयस्ततो वेदान् लेभिरे तत्कथा "तस्माद्वेदाननुप्राप्य पुनर्धर्मं प्रचक्रिरे। षष्टिर्मुनिसहस्राणि शिष्यत्वं प्रतिपेदिरे। सारस्वतस्य विप्रर्षेर्वेदस्वाध्यायकारणात्"। देशभेदश्च "मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः। पाञ्चालशाल्वमाण्डव्यं कुरुक्षेत्रगजाह्वयम्"